Nataraja-Gitika

# नटराज-गीतिका

## Document Information

Text title : Nataraja Gitika

File name : naTarAjagItikA.itx

Category : shiva, sanskritgeet, hkmeher

Location : doc_shiva

Author : Harekrishna Meher meher.hk at gmail.com

Transliterated by : Harekrishna Meher

Proofread by : Harekrishna Meher

Description/comments : Sanskrit K□vya M□trig□tik□□jalih

Acknowledge-Permission: Dr. Harekrishna Meher

Latest update : October 31, 2023

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

October 30, 2023

*sanskritdocuments.org*

# नटराज-गीतिका

ॐ त्र्यम्बकं यजामहे,
पावकं यजामहे ।
प्रभो प्रसीद साम्ब हे !
सादरं भजामहे,
परात्परं भजामहे,
महेश्वरं भजामहे ।
त्र्यम्बकं यजामहे, त्र्यम्बकं यजामहे ॥ (ध्रुवम्) ॥

देव-वृन्द-वन्दितम्, नन्दितम्,
धूर्जटिं नटराजम् ।
योगि-योग-भावितम्, सेवितम्,
रुद्र-रूप-विराजम् ।
विभूति-भूषणं विभुं भास्वरं भजामहे,
शुभङ्करं भजामहे,
महेश्वरं भजामहे ।
त्र्यम्बकं यजामहे, त्र्यम्बकं यजामहे ॥ १ ॥

विलसति मन्दाकिनी, स्यन्दिनी,
मस्तके सुशोभिता ।
शैलराज-नन्दिनी, मोदिनी,
प्रियतमा विराजिता ।
शिवं शशाङ्क-शेखरं शङ्करं भजामहे,
जगद्धरं भजामहे,
महेश्वरं भजामहे ।
त्र्यम्बकं यजामहे, त्र्यम्बकं यजामहे ॥ २ ॥

प्रिया-लास्य-वर्त्तितम्, शाम्भवम्,

ते प्रचण्ड-ताण्डवम् ।
अष्टमूर्त्ति-कीर्त्तितम्, भैरवम्,
नष्ट-दुष्ट-दानवम् ।
पुरान्तकं हि सन्ततं सुन्दरं भजामहे,
सुखाकरं भजामहे,
महेश्वरं भजामहे ।
त्र्यम्बकं यजामहे, त्र्यम्बकं यजामहे ॥ ३॥

भवं वृषभ-वाहनम्, शोभनम्,
पशुपतिं पिनाकिनम् ।
नदित-डमरु-निस्वनम्, मोहनम्,
व्योमकेश ! शूलिनम् ।
भुजङ्ग-हारमोजसां सागरं भजामहे,
दिगम्बरं भजामहे,
महेश्वरं भजामहे ।
त्र्यम्बकं यजामहे, त्र्यम्बकं यजामहे ॥ ४॥

दिव्य-भोग-दायकम्, मङ्गलम्,
प्रमथ-निकर-नायकम् ।
विजित-पुष्प-सायकम्, शितिगलम्,
भस्म-गौर-कायकम् ।
गिरीशमाशुतोष हे ! सुस्वरं भजामहे,
सुधा-झरं भजामहे,
महेश्वरं भजामहे ।
त्र्यम्बकं यजामहे, त्र्यम्बकं यजामहे ॥ ५॥

भक्त-हृदय-दीपकम्, स्वस्तिदम्,
विश्वनाथ ! शाश्वतम् ।
क्षपित-सकल-पातकम्, मुक्तिदम्,
महाकाल-दैवतम् ।
“नमः शिवाय” सुभक्त्या गोचरं भजामहे,
सदक्षरं भजामहे,
महेश्वरं भजामहे ।
त्र्यम्बकं यजामहे, त्र्यम्बकं यजामहे ॥ ६॥

सर्व-रोग-हारकम्, तारकम्,
    यतीशं कृपामयम् ।
दक्ष-दर्प-दारकम्, धारकम्,
    सविनयं नुमो वयम् ।
क्षमस्व दोष-समस्तं त्वां हरं भजामहे,
    अनश्वरं भजामहे,
    महेश्वरं भजामहे ।
त्र्यम्बकं यजामहे, त्र्यम्बकं यजामहे ॥ ७॥

– गीत-रचना : डॉ हरेकृष्ण-मेहेरः
(मातृगीतिकाञ्जलिः- काव्यतः)

Copyright Dr.Harekrishna Meher

*Nataraja-Gitika*
pdf was typeset on October 30, 2023

Please send corrections to *sanskrit@cheerful.com*